IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

एकाक्षरीसंज्ञाकरणं मुग्धबोधकारस्य चमत्कारित्वम्

Antara Bhattacharya
Research Scholar
Department of Sanskrit
Ranchi University
Shahid Chowk, Ranchi- 834001
Jharkhand, India

सारांश -

अष्टाध्यायी व्याकरणशासित संस्कृतभाषाम् संक्षिप्ताकारेण छात्राणां कृते परिवेशनं वोपदेवस्य मुग्धबोधव्याकरणस्य उपस्थापना। शब्दनिर्माने तथा व्याकरणस्य उपयोगे एकाक्षरस्य प्रयोगं यद्यपि आपिशलि पाणिनि प्रभृतीनां व्याकरणाचार्यानां कतिपय प्रयोगं निर्दिष्टम्, परन्तु वोपदेवेन एकाक्षरस्य स्थापनं अधिकतर व्यापकत्वं व्याकरणमध्ये प्रदर्शितम्। संज्ञा-सन्धि-शब्द-स्त्रीप्रत्ययः, कारक -समासः, तद्धित, धातु, कृत् प्रत्ययादि क्षेत्रे विषयविन्यासं तथा अनायासेन सूत्राणां आयत्ताविषये वालानां सुखबोधाय च एकाक्षरी विन्यासं वोपदेवेन अभिनवत्वं प्रदर्शितम्। अतः मुग्धबोधव्याकरणस्य एकाक्षरी संज्ञाकरणं चमत्कारित्वं दृष्ट्वा व्याकरणशिक्षार्थिनां सदैव ग्रहणीयम् भविष्यन्ति इति मनसि निधाय एतद्विषये सामान्यालोचना प्रदर्शनं ममाभिप्रायः।

कूटशब्दः - वोपदेव, एकाक्षरी प्रयोगः, शिवसूत्र, ह्रस्वादि संज्ञासूत्र, उपसर्गसंज्ञा, विभक्तिसंज्ञा, कारकः, लघु-गुरु, धातु, समासः।

पाणिन्युत्तर व्याकरण रचयितृणाम् अग्रगण्यः व्याकरणाचार्यरूपेण विशेषतः 'मुग्धबोधव्याकरण' प्रणेता इति श्री वोपदेवस्य आविर्भावः भारतवर्षे अद्यावधि चर्चितः। त्रयोदश शतकस्य प्रथमार्द्धे महाराष्ट्रस्य वरदातटे वेदपदनामकस्थाने माराठी वैद्यवंशीय ब्राह्मणकूले वोपदेवस्य जन्मः। पिता च केशवः तथा विद्यागुरु धनेशः विशिष्ट पण्डितः। मुग्धबोध व्याकरणग्रन्थस्य अन्तिमे एतद्विषये लिखितम्-

विद्वद्धनेश्वरच्छात्रो भिषक् केशवनन्दनः।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम्।[1]

मुग्धबोधव्याकरणस्य परिचय: -

'मुग्धबोधव्याकरणम्' पाणिनि व्याकरणस्य परवतर्ती समये संक्षिप्तकारत्वेन व्याकरणजगति प्रसिद्ध:। अष्टाध्यायी व्याकरणस्य परवर्ती समये मुग्धवोधव्याकरणस्य रचनाया: विशेष तात्पर्यं स्वल्पसमये व्याकरणशिक्षा। एतेन कारनेन स्वल्पसूत्रेण व्याकरणज्ञानलाभार्थं अस्य व्याकरणस्य उपयोगिता। पाणिनिव्याकरणे न्यूनाधिक: चतुसहस्रसूत्रमस्ति, परन्तु मुग्धबोधव्याकरणे द्वादशशतकेन सूत्रेण व्याकरणं परिपूर्णम्। एतद्व्यातीत मुग्धबोधव्याकरणे एकाक्षरसंज्ञा विशिष्ट स्थानमधिकरोति। प्रकरणविन्यासः मुग्धवोधस्य अन्यतम स्वतन्त्रता। पाणिनि वा अष्टाध्यायी व्याकरणं प्रकरणविन्यासवर्जितम्।

पाणिनि व्याकरणस्य विश्लेषनात्मकं पद्धतिं विहाय संश्लेषणात्मक पद्धति ग्रहनेन अस्य व्याकरणस्य महत्त्वं वोपदेवेन सूचितम्। वीजगणितवत् मुग्धबोधीय एकाक्षर संज्ञाकरणेन वर्णात् शब्दं, शब्देन समासं समासात् वाक्यगठनं क्रमान्वयेन अनुसूतः। यद्यपि आपिशलि तथा पाणिनि व्याकरणे संक्षिप्तकरणं कृतम् परन्तु मुग्धबोधकारेण भिन्नत्वं परिवेशितम्।

पाणिनि व्याकरणे ति, घु, भ प्रभृति एकाक्षर शब्दस्य प्रयोगं दृष्टम्। वोपदेवेन एकाक्षर शब्दस्य प्रयोगं विशेषत तात्पर्यपूर्णम्।

शिवसूत्रस्य परिवर्तनं-

पाणिनि व्यवहृत चतुर्दश शिवसूत्रम् वा प्रत्याहारसूत्रं मुग्धबोधव्याकरणे दश सूत्रेण कृतम्। वर्णमाला क्रिश्चित् परिवर्तनं वा कृत्रिमभावेन विन्यस्तं। यथा- अ इ उ ऋ ऌ क्, ए ओ ङ्, ऐ औ च्, ह य व र ल, ञ ण न ङ म, झ ढ ध घ भ, ज ड द ग व, ख फ छ ठ थ, च ट त क प, श ष साद्यन्ताख्याः।[2]

माहेश्वरसूत्र अ इ उ ण्, ऋ ऌ क्- अत्र मुग्धबोधकारस्तु इत् वर्ण (ण) वर्जनेन तथा सूत्रद्वयम् एकमेव सूत्रेण स्थापितम्। पाणिनिकृत द्विचत्वारिंशत् प्रत्याहारं केवलं चत्वारिंशत् प्रत्याहारेण मुग्धबोधेन समाप्तम्।

ह्रस्व दीर्घ प्लुत संज्ञाकरणे मुग्धबोधस्य कृत्रिमता-

पाणिनिना ह्रस्व दीर्घ प्लुत संज्ञाकरणम् -'ऊकालोऽज्ह्रस्वदीर्घप्लुतः'[3] कृतम्। मुग्धबोधेन तत्र एकाक्षरेण 'स्व' इति ह्रस्वः, र्घः- इति दीर्घः, 'प्लु'- अक्षरेण प्लुतसंज्ञा निर्दिष्टम्।

सवर्ण संज्ञाकरणम् 'र्ण' इति वर्णेन क्रियात्मकं भवति। वर्गानां उच्चारणं प्रथमवर्णे उकार ग्रहणेन प्रत्येक वर्गमध्ये स्वेषां अक्षरं युक्तं भवति। यथा- कु= क-ख-ग-घ-ङ, चु= च-छ-ज-झ-ञ वर्णानां अन्तर्भुक्तं प्रदर्शितम्।

गुण-वृद्धि संज्ञाकरणे संक्षिप्ताक्षरस्य वोपदेवेन गाणितीक पद्धतिं प्रदेयम्। 'णु' शब्देन गुणः कार्यं। 'गुण' इति शब्दस्य शेषवर्णमाश्रित्य 'णु' अक्षर ग्रहणेन 'गुण' विधानं तथा 'वृद्धि' शब्देन आदि अक्षर 'वृ' शब्देन क्रियते। 'व्रि' संज्ञा 'अच आरालैज् व्रिः'[4] सूत्रेण आ-आर्, आल्, ऐच् अर्थात्, आ-ऐ, औ- आर्-आल् वृद्धिकार्यम्। गुणकार्ये अर्-अल्- एङ्= अ-ए-ओ- अर्- अल् विधानम् मुग्धबोधकारेण उपस्थापितम्।

उपसर्ग विधानम्-

उपसर्ग शब्दस्य अन्तिम वर्ग 'ग' ग्रहणेन 'गिः' अक्षरेण उपसर्गं क्रियते। 'प्रपरापसंन्य..... गिः'[5] सूत्रेण उपसर्गं व्याकरणाचार्येन स्पष्टीकृतम्।

आचार्य पाणिनिना द्वाविंशति उपसर्गं क्रियते। मुग्धबोधकारेण निस्, दुस्, उपसर्गं न लिपिवद्धम्। पाणिनिना निस्, दुस् उपसर्गेन द्वाविंशोपसर्गेन अधिकतम मान्यता लब्धम्। गति शब्द 'गतिश्च' (1/4/60) सुत्रेण प्र प्रभृतिः शब्दा क्रियायोगे गतिसंज्ञाः प्राप्ताः। मुग्धबोधकारेण 'गति' संज्ञा वा शब्दः वर्जितोऽभवत्। प्रक्रियाकार : श्रीरामचन्द्रेन मुग्धबोधकार प्रदर्शितं मार्गं अनुसृतम्।

विभक्ति विधानार्थम्-

विभक्ति निमित्तं अस्य शब्दस्य शेषाक्षरेण अर्थात् 'क्ति' इति ग्रहणेन सिप्= सि अर्थात् -सि ओ जस् अम् औ शस्- ङि औस्- सुप् इति वर्णानां प्रत्ययाः शब्दविभक्तिरूपेण तथा 'ति' अक्षरेण साशीतिशतसंख्यकानि (180) तिङन्त वा धातुविभक्तिरूपेण वोपदेवेन कृतम् [सूत्र यथा सित्यादि क्तिः= स्यादिः (सि-आदि) त्यादिश्च (ति-आदि) 'क्ति' संज्ञा]। पाणिनीय मतानुसारेण 'तिप् तस् झि- मस् तातांझ' इति अष्टादश प्रत्ययाः तिङन्त प्रत्ययर्थम्।

'स्वौजसमौट्.....' सुप् एकविंशति संख्यकाः प्रत्यया: शब्दरूपार्थं सूत्रेण-गृहीतम्। पाणिनिरपेक्षया मुग्धबोधकारेण अत्यन्तं संक्षिप्तं एकाक्षर सन्निधानं अत्यन्त गौरवम् मन्ये।

पद तथा लिङगार्थं-

पद तथा लिङगार्थं वोपदेवेन 'द' शब्देन पदं, 'लि' अक्षरेण लिङ्गं वोध्यम्। 'सुप्' तथा 'तिङन्त' प्रत्ययं पाणिनीय मतेन पद संज्ञकं भवति। सप्= सु औ जस्- सुप् पर्यन्तं, तिङ्= तिप्, तस्, झि- महिङ् पर्यन्तं पद संज्ञकं चिह्नितम्। वोपदेवेन एकाक्षरीविधानं केवलं 'द' इति पदं सूचितम्।

- वचन प्रकाशार्थं मुग्धबोधकारस्तु एकवचनार्थं 'क्व' इति द्विवचनार्थं 'द्व', वहुवचनार्थं 'व्व' एकाक्षरेण वचनत्रयानां सुस्पष्टीकृतम्।

पाणिनि मतानुसारेण द्वित्व-एकत्वयोः द्विवचनम् तथा एकवचनम् (1/4/22) बहुत्वविवक्षायां बहुवचनं)1/4/21) कृतम्।

- पुरुषाणां कृते वोपदेवेन अस्मद् शब्देन उत्तमपुरुषः। युष्मद् शब्देन मध्यमपुरुषः। तद्भिन्न शब्देन प्रथमपुरुषः।

अतीतः, वर्तमानः, भविष्यत् कालाय भूत, भवत्, भव्य इति शब्दं लिखितम्। अस्मिन् प्रसङ्गे व्याकरणाचार्येण पाणिनिना अतीत- वर्तमान- भविष्यत् शब्दव्यवहारः दृष्टः।

कारकानां कृते एकाक्षरी प्रयोगाः -

प्रथमाविभक्तिनिमित्तं 'प्री', द्वितीयार्थं 'द्वी' तृतीया निमित्तकं 'त्री', चतुर्थ्यं 'ची', पञ्चम्यां- 'पी', षष्ठ्यर्थं- 'षी', सप्तम्यार्थे 'सी' एकाक्षर ग्रहणं अस्मिन् व्याकरणे अभिनवत्वं दृश्यते। 'सी' अक्षरेण 'प'- 'त' पर्यन्तम् वर्णानां उपस्थितिः। कर्त्र्यर्थे 'घ' संज्ञा, कर्मणः - 'ढ' करणार्थे 'ध', सम्प्रदान- 'भ' अपादान- 'ज', अधिकरण- 'ड'।

लघु-गुरु नियमार्थं एकाक्षरी प्रयोगं-

'घु' इति लघु संज्ञा, 'रु' गुरुः संज्ञा। स्व= ह्रस्व, र्घः= दीर्घः। ह्रस्वस्य लघु संज्ञा, तथा दीर्घस्य गुरु संज्ञा। मूल शब्दस्य 'ह्रस्व' 'स्व' एकाक्षरग्रहणं च 'दीर्घ' शब्दस्य शेषाक्षर 'घ' अक्षरेण दीर्घत्व ग्रहणं वोपदेवेन मात्रालाघवं कृतम्।

अभ्यास, सम्प्रसारणार्थं एकाक्षरी-

द्विरुक्त धातोः पूर्वभागं अभ्यास संज्ञा भवति। मुग्धबोधकारेण एकाक्षरी संज्ञा ग्रहणात् 'खि' शब्देन अभ्यास कार्यं करणीयम्।

पाणिनिना 'पूर्वोऽभ्यास'[6] सूत्रेण द्विरुक्तधातोः पूर्वभागं अभ्यासं कृतम्। पाठकानां संक्षिप्तभावेन स्मृत्यर्थं एकाक्षरस्य प्रयोगं अनायासं मन्ये। 'जि' एकाक्षरेण सम्प्रसारणं वोपदेवेन कृतम्।

धातुपाठे दशलकाराणां एकाक्षर स्थापना-

लटादि दशलकाराणां कृते एकाक्षर स्थापनेन वोपदेवः लकारं स्थापितम्। की= लट्, खी= विधिलिङ्, गी= लोट्, घी= लङ्, टी= लुङ्, ठी= लिट्, डी= लुट्, ढी= आशीर्लिङ्, ती= लृट्, थी= लृङ्। परस्मैपदनिमित्तं 'प' तथा आत्मनेपदार्थं 'म' अक्षरेण सुचितम्।

सार्वधातुकम् आर्धधातुक संज्ञाकरणे एकाक्षरस्य प्रयोगम्-

पाणिनीय व्याकरणे तिङ् प्रत्ययस्य तथा शित् प्रत्ययं सार्वधातुकरुपेण सूच्यते। वोपदेवेन एकाक्षर 'र' शब्दस्य प्रयोगेन सार्वधातुक संज्ञा विहितम्। 'अर' इति आर्धधातुकम् । अष्टाध्यायीकारेण 'शेष' शब्देन आर्धधातुकं क्रियते।

वचनार्थे एकाक्षरी प्रयोगः -

एकवचनम् प्रयोगार्थं 'क्व' अक्षरं चिह्नितम्, द्विवचनार्थे 'द्व' बहुवचनार्थे 'ब्व' अक्षरस्य प्रयोगः सांकेतिक सम्पन्नः। पाणिनीय प्रयोगे एकवचन-द्विवचन-बहुवचन शब्दस्य प्रयोगः सूत्रेण उपस्थापितः। तानि एकवचन....न्येकशः(1/4/102)। क्व-द्व-व्व अक्षर् प्रयोगार्थं 'एकवचन' शब्दस्य 'क्व' इति एकाक्षरं, 'द्विवचन', शब्दस्य 'द्व' इति अक्षरं 'बहुवचन' शब्दस्य 'व्व' अक्षरस्य युक्तेन वोपदेवः नवरुपेण शिक्षार्थिनां कृते अभिनवत्वं योजितम्।

समास संज्ञार्थकं एकाक्षरी प्रयोगः -

वोपदेवेन संक्षिप्तभावेन ब्याकरणस्य प्रयोजनार्थं अक्षराणां एकाक्षरीं कृतम्। समासार्थे 'स' अक्षरं प्रयोगेम्। द्वि वा बहवः पदानां एकपदीकरणं 'समास' (स) भवति।

'च' अक्षरेण द्वन्द्व समासः, 'ह' इति वह बहुव्रीहि समासः। 'य' इति कर्मधारयः, 'ष' इति तत्पुरुषः समासः। 'ग' द्विगुसमासः, 'व' इति अक्षरेण अव्ययीभावः क्रियते। समासस्यान्तर्गतः आदिपदं पूर्वपदं शेषपदं उत्तरपदं इति मन्ये।

ङ. क्षितीश चन्द्र च्याटार्जी सम्पादित 'Technical Terms of Sanskrit Grammar' पुस्तके मुग्धबोधकार वोपदेवेन गीता शास्त्रात् 'द्वन्द्व' समास विषये अनुसृतम्[7] इति उक्तम् दशमेऽध्याये-

'अक्षराणामकारोऽस्मि द्वन्द्वः समासिकस्य च....'।[8]

आचार्यः वोपदेवः व्याकरणस्य प्रारम्भे 'मुकुन्दं सच्चिदानन्दं प्रणिपत्य.....' इति भगवन् नारायणं नमस्करोति। परन्तु प्रथमसूत्रे 'ओं नमः शिवायः' इति शिवं प्रणमति। तथा द्वन्द्वः समासस्य उदाहरण प्रसङ्गे 'हरिहरौ' इति उदाहरणम् अददत्। अत्र वोपदेवस्य धर्मविषये ऐकान्तिकी श्रद्धा उपलब्धः।

- उदात्त- अनुदात्त- स्वरित स्वरविषये मुग्धबोधकारेण न लिपिबद्धम्। वैदिक स्वरज्ञानविषये अस्य प्रयोजनम् भवति। अष्टाध्यायीकारेण उच्चस्वराभिधातत्वात् उदात्तम्, 'उच्चैरुदात्तः' इति सूत्रेण तथा निम्नस्वरोच्चारणार्थं अनुदात्तस्वरं 'नीचैरनुदात्तः' इति सूत्रं, स्वरस्य साम्यावस्थायां उच्चारणार्थं समाहार स्वरम् 'समाहारः स्वरितः' इति सूत्रं कृतम्। वोपदेवेन अस्य प्रयोजनम् वा वैदिक व्याकरणविषये सूत्रालोचना परित्यक्तम्।

नदी संज्ञकार्थे तथा अन्यान्य संज्ञाकरणे एकाक्षरस्य प्रयोगः-

नित्य स्त्रीलिङ्ग, दीर्घ ई-कारान्त, दीर्घ ऊ-कारान्त शब्दस्य नदीसंज्ञा वोपदेवेन एकाक्षरेण 'दी' इति कृता। 'नदी' शब्दस्य शेषाक्षरं ग्रहणेन केवलं 'दी' इति नदीसंज्ञकं चिह्नितम्।

- घि संज्ञा- सि औ जस्, अम् औ- इति पञ्चाक्षराणि 'घि' संज्ञार्थाः मुग्धबोध प्रदर्शिता। 'स्यमौजस् घिः' (82)।

मुग्धबोधकारेण पुंलिङ्गम्, स्त्रीलिङ्गम्, क्लीवलिङ्गम् इति त्रिविध लिङ्गस्य विशेषतः 'क्लीव' शब्देन नपुंसकलिङ्गम् अस्य व्याकरणस्य प्रयोगम्। अर्थात् पाणिनीय नपुंसकलिङ्गं मुग्धबोधेन 'क्लीव' शब्देन अभिहितम्।

- 'नि' इकार योगेन निपातसंज्ञा तथा 'नी' ईकारयोगे उपध्मानीय (विसर्गस्य आकृतिविशेषः) वोपदेवेन उक्तम्।
- धातूनां भ्वादि प्रभृति दशगणानां सहज परिचयार्थं एकाक्षर संज्ञा स्वीय कविकल्पद्रुमः धातुपाठे अङ्किता यथा-

  चुरादिगणार्थे- 'क'

  अदादिः - 'ल'

  क्र्यादिः - 'ग'

  दिवादिः- 'य'

  तनादि- 'त'

  रुधादिः- 'ध'

स्वादिः - 'न' प्रभृतयः एकाक्षरं चिह्नितम्।

- 'ङ' एकाक्षरेण आत्मनेपदी 'ञ' इति उभयपदी 'ङ' तथा 'ञ' भिन्ने परस्मैपदी संज्ञा वोपदेवेन गठिताः।

निष्कर्षः –

अष्टाध्यायी व्याकरणमनुसृत्य पाणिन्युत्तर वैयाकरणाचार्य वोपदेवेन लघुपाये च छात्राणां कृते मुग्धबोध व्याकरणम् रचितम्। अस्मिन् व्याकरणग्रन्थे द्व्यक्षर वा त्र्यक्षरशब्दान् एकाक्षरार्थं प्रथमाक्षरं वा अन्तिमक्षरेण संज्ञाकरणं आचार्यस्य महत्वं प्रतिपादितम्।

मुग्धबोधव्याकरणप्रणाली वोपदेवेन वीजगाणितिक पद्धतिवत् दृश्यते। अस्त शब्दानाम् अधिकांश प्रकृतिः एकाक्षरसंयुक्तः। अस्य व्याकरणस्य वर्णमाला वा संज्ञाविधि यथा अ, इ, उ, ऋ, ऌ क्, ए ओ ङ् इत्यादि पाणिनि व्यवहृत शिवसूत्रम् प्रचलित प्रसिद्धधाराविहीनं कृत्रिमरूपेण सुसज्जितम्।

पाणिनिना यद्यपि घु, भ घि प्रभृति एकाक्षर संज्ञाकृता तथापि मुग्धबोधकारेण एकाक्षरसंज्ञा अधिकतम कृत्रिमम् तथा ग्रहणीयम् कारणमेतत् अस्य व्याकरणस्य प्रासङ्गिकी मुग्धबोधछात्राणां समादरं लभते इति मन्ये।

पादटीकाः –

---

[1] मुग्धबोधव्याकरणम्, श्यामाचरण विद्यावारिधि, पृ0 797

[2] मुग्धबोधव्याकरणम्, श्री निरञ्जनस्वरूप ब्रह्मचारी पृ0 8

[3] लघुसिद्धान्तकौमुदी, 1/2/27

[4] मुग्धबोधव्याकरणम्, सूत्र 09

[5] तदेव, सूत्र 10

[6] सिद्धान्तकौमुदी, 6/1/4

[7] Technical Terms of Sanskrit Grammar, P0 362

[8] श्रीमद्भगवद्गीता, 10/33

References:

1. विद्यावारिधि श्यामाचरण, मुग्धबोध व्याकरणम्, प्रथम संस्करण, कविरत्न भवन, हाओडा, 1344

2. ब्रह्मचारी श्री निरञ्जनस्वरूप, मुग्धबोधं व्याकरणम्, प्रथम संस्करण, संस्कृत पुस्तक भाण्डार, कलिकाता, 1391

3. शर्मा गिरिधर, वैयाकरण सिद्धान्तकौमुदी, प्रथम संस्करण, मोतिलाल वेनारसीदास, दिल्ली, 1961

4. रघुनाथ वि0, वोपदेवशतक, निर्णयसागर प्रेस, मुम्बई, 1889

5. Chatterjee Kshitish Chandra, Technical Terms of Sanskrit Grammar, 1st Ed. Sanskrit Book Depot, Kolkata, 1948

6. Cardona George, Panini a survey of research, 1st Ed. Motilal Banarsidass Publishers, Delhi, 1997